.. shrii krishNa puujaa vidhi ..

# ॥ श्री कृष्ण पूजा विधि ॥

1 AT THE REGULAR ALTAR

सर्वेभ्यो गुरुभ्यो नमः ।
सर्वेभ्यो देवेभ्यो नमः ।
सर्वेभ्यो ब्राह्मणेभ्यो नमः ॥

प्रारंभ कार्यं निर्विघ्नमस्तु । शुभं शोभनमस्तु ।
इष्ट देवता कुलदेवता सुप्रसन्नो वरदो भवतु ॥

अनुज्ञां देहि ॥

AT THE KRISHNA ALTAR
2 ACHAMANA:

केशवाय स्वाहा । ॐ नारायणाय स्वाहा ।
ॐ माधवाय स्वाहा । गोविंदाय नमः ।
विष्णवे नमः । ॐ मधुसूदनाय नमः ।
त्रिविक्रमाय नमः । वामनाय नमः ।
श्रीधराय नमः । ॐ हृषीकेशाय नमः ।
ॐ पद्मनाभाय नमः । दामोदराय नमः ।
संकर्षणाय नमः । ॐ वासुदेवाय नमः ।
ॐ प्रद्युम्नाय नमः । ॐ अनिरुद्धाय नमः ।
ॐ पुरुषोत्तमाय नमः । ॐ अधोक्षजाय नमः ।
ॐ नारसिंहाय नमः । ॐ अच्युताय नमः ।
जनार्दनाय नमः । ॐ उपेंद्राय नमः ।
हरये नमः ।

श्री कृष्णाय नमः ॥

3 PRAANAAYAAMAH

ॐ प्रणवस्य परब्रह्म ऋषिः । परमात्मा देवता । दैवी गायत्री छन्दः । प्राणायामे विनियोगः ।

ॐ भूः । ॐ भुवः । स्वः । ॐ महः । जनः ।
तपः । सत्यं । ॐ तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमही
धियो यो नः प्रचोदयात् ॥

(Repeat aachamana )

ॐ आपोज्योति रसोमृतं ब्रह्म भूर्भुवस्सुवरोम् ॥

4 SAMKALPAH

श्रीमान् महागणाधिपतये नमः ।

श्री गुरुभ्यो नमः । श्री सरस्वत्यै नमः ।
श्री वेदाय नमः । श्री वेदपुरुषाय नमः ।
इष्टदेवताभ्यो नमः । कुलदेवताभ्यो नमः ।
स्थानदेवताभ्यो नमः । ग्रामदेवताभ्यो नमः ।
वास्तुदेवताभ्यो नमः । शचीपुरंदराभ्यां नमः ।
उमामहेश्वराभ्यां नमः । मातापितृभ्यां नमः ।
लक्ष्मीनारायणाभ्यां नमः ।

सर्वेभ्यो देवेभ्यो नमो नमः ।
सर्वेभ्यो ब्राह्मणेभ्यो नमो नमः ।
येतद्कर्मप्रधान देवताभ्यो नमो नमः ॥

॥ अविघ्नमस्तु ॥

सुमुखश्च एकदंतश्च कपिलो गजकर्णकः ।
लंबोदरश्च विकटो विघ्ननाशो गणाधिपः ॥
धूम्रकेतुर्गणाध्यक्षो बालचन्द्रो गजाननः ।
द्वादशैतानि नामानि यः पठेत् श्रुणुयादपि ॥
विद्यारंभे विवाहे च प्रवेशे निर्गमे तथा ।
संग्रामे संकटेश्चैव विघ्नः तस्य न जायते ॥

शुक्लांबरधरं देवं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्व विघ्नोपशांतये ॥

सर्वमंगल मांगल्ये शिवे सर्वार्थ साधिके ।
शरण्ये त्र्यंबके देवी नारायणी नमोऽस्तुते ॥

सर्वदा सर्व कार्येषु नास्ति तेषां अमंगलं ।
येषां हृदिस्थो भगवान् मंगलायतनो हरिः ॥

तदेव लग्नं सुदिनं तदेव ताराबलं चंद्रबलं तदेव ।
विद्या बलं दैवबलं तदेव लक्ष्मीपतेः तेंघ्रिऽयुगं स्मरामि ॥

लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः ।
येषां इन्दिवर श्यामो हृदयस्थो जनार्दनः ॥

विनायकं गुरुं भानुं ब्रह्माविष्णुमहेश्वरान् ।
सरस्वतीं प्रणम्यादौ सर्व कार्यार्थ सिद्धये ॥

श्रीमद् भगवतो महापुरुषस्य विष्णोराज्ञाय प्रवर्तमानस्य
अद्य ब्रह्मणोऽद्वितीय परार्धे विष्णुपदे श्री श्वेतवराह कल्पे
वैवस्वत मन्वन्तरे भारत वर्षे भरत खंडे जंबूद्वीपे
दण्डकारण्य देशे गोदावर्या दक्षिणे तीरे कृष्णवेण्यो उत्तरे
तीरे परशुराम क्षेत्रे (सम्युक्त अमेरिका देशे, St Lewis ग्रामे,
Australia देशे, victoria ग्रामे , बह्रीनु देशे)
शालिवाहन शके वर्तमाने व्यवहारिके धातु नाम संवत्सरे
दक्षिनायणे वर्स्षे ऋतौ, श्रावण मासे, कृष्ण पक्षे, अष्टम्याम् तिथौ,
रोहिणी नक्षत्रे, सोम वासरे, सर्व ग्रहेषु यथा राशि
स्थान स्थितेषु सत्सु येवं गुणविशेषेण विशिष्टायां
शुभपुण्यतिथौ मम आत्मन श्रुतिस्मृतिपुराणोक्त फलप्राप्त्यर्थं
मम सकुटुम्बस्य क्षेम स्थैर्य आयुरारोग्य चतुर्विध पुरुषार्थ
सिध्यर्थं अंगीकृत श्री कृष्ण जन्माष्टमी व्रतांगत्वेन संपादित
सामग्रय्या श्री बालकृष्ण प्रीत्यर्थं यथा शक्त्या यथा
मिलितोपचार द्रव्यैः पुरुषसूक्त, श्री सूक्त पुराणोक्त मन्त्रैश्च
ध्यानावाहनादि षोडशोपचारे श्री बालकृष्ण पूजां करिष्ये ॥

इदं फलं मयादेव स्थापितं पुरतस्तव ।
तेन मे सफलावाप्तिर्भवेत् जन्मनिजन्मनि॥

(keep fruits in front of the Lord)

5 SHADANGA NYASA
(touching various parts of the body)

कृष्णाय नमः । अन्गुष्ठाभ्यायां नमः ।
(touch the thumbs)
हृदयाय नमः ॥
ॐ बालभद्राय नमः । तर्जनीभ्यां नमः ।
(touch both fore fingers)
शिरसे स्वाहा ॥
वासुदेवाय नमः । मध्यमाभ्यां नमः ।
(touch middle fingers)
शिखायेय् वौषट् ॥
ॐ अनिरुद्धाय नमः । अनामिकाभ्यां नमः ।
(touch ring fingers)
कवचाय हुम् ॥
यधुपुङ्गवाय नमः । कनिष्ठिकाभ्यायं नमः ।
(touch little fingers)
नेत्रत्रयाय वौषट् ॥
रुग्मिणीवल्लभाय नमः । करतलपृष्ठाभ्यायां नमः ।
अस्त्राय फट् ॥
(snap finger, circle head clockwise and clap hands)

6 DIGBANDHANA

ॐ बालकृष्णेति दिग्बन्धः । दिशो बद्नामि ॥
¡Show mudra¿

7 GANAPATI PUUJA

आदौ निर्विघ्नतासिध्यर्थं महा गणपतिं पूजनं करिष्ये ।
गणानां त्वा शौनको घृत्समदो गणपतिर्जगति
गणपत्यावाहने विनियोगः ॥
(pour water)

गणानां त्वा गणपतिं आवामहे ।
कविं कविनामुपम श्रवस्तमं ।
ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत ।
आनः शृण्वन्नूतिभिः सीदसादनं ॥

भूः गणपतिं आवाहयामि ।
भुवः गणपतिं आवाहयामि ।
स्वः गणपतिं आवाहयामि ।

ॐ भूर्भुवस्वः महागणपतये नमः ।
ध्यायामि । ध्यानं समर्पयामि ।

ॐ महा गणपतये नमः । आवाहनं समर्पयामि ।
ॐ महा गणपतये नमः । आसनं समर्पयामि ।
ॐ महा गणपतये नमः । पाद्यं समर्पयामि ।
ॐ महा गणपतये नमः । अर्घ्यं समर्पयामि ।
ॐ महा गणपतये नमः । आचमनीयं समर्पयामि ।
ॐ महा गणपतये नमः । स्नानं समर्पयामि ।
ॐ महा गणपतये नमः । वस्त्रं समर्पयामि ।
ॐ महा गणपतये नमः । यज्ञोपवीतं समर्पयामि ।
ॐ महा गणपतये नमः । चंदनं समर्पयामि ।
ॐ महा गणपतये नमः । परिमल द्रव्यं समर्पयामि ।
ॐ महा गणपतये नमः । पुष्पाणि समर्पयामि ।
ॐ महा गणपतये नमः । धूपं समर्पयामि ।
ॐ महा गणपतये नमः । दीपं समर्पयामि ।
ॐ महा गणपतये नमः । नैवेद्यं समर्पयामि ।
ॐ महा गणपतये नमः । ताम्बूलं समर्पयामि ।
ॐ महा गणपतये नमः । फलं समर्पयामि ।
ॐ महा गणपतये नमः । दक्षिणां समर्पयामि ।
ॐ महा गणपतये नमः । आर्थिक्यं समर्पयामि ।

ॐ भूर्भुवस्वः महा गणपतये नमः ।
मन्त्रपुष्पं समर्पयामि ।
ॐ भूर्भुवस्वः महा गणपतये नमः ।
प्रदक्षिणा नमस्कारान् समर्पयामि ।
ॐ भूर्भुवस्वः महा गणपतये नमः ।
छत्रं समर्पयामि ।

ॐ महा गणपतये नमः । चामरं समर्पयामि ।
ॐ महा गणपतये नमः । गीतं समर्पयामि ।
ॐ महा गणपतये नमः । नृत्यं समर्पयामि ।
ॐ महा गणपतये नमः । वाद्यं समर्पयामि ।
ॐ महा गणपतये नमः । सर्व राजोपचारान् समर्पयामि ॥

॥ अथ प्रार्थना ॥

वक्रतुण्ड महाकाय कोटि सूर्य समप्रभ ।
निर्विघ्नं कुरु मे देव सर्व कार्येषु सर्वदा ॥

ॐ भूर्भुवस्वः महा गणपतये नमः । प्रार्थनां समर्पयामि ।

अनया पूजया विघ्नहर्ता महा गणपति प्रीयताम् ॥

8 DIIPA STAPANA

अथ देवस्य वाम भागे दीप स्थापनं करिष्ये ।
अग्निनाग्नि समिध्यते कविर्ग्रहपतिर्युवा हव्यवात् जुवास्यः ॥
(light the lamps)

9 BHUUMI PRARTANA

महिद्यौ पृथ्वीचन इमं यज्ञं मिमिक्षतां पिप्रतान्नो भरीमभिः ॥

10 DHANYA RASHI

ॐ औषधय संवदंते सोमेन सहराज्ञ ।
यस्मै कृणेति ब्राह्मणस्थं राजन् पारयामसि ॥
(Touch the grains/rice/wheat)

11 KALASHA STAPANA

ॐ आ कलशेषु धावति पवित्रे परिसिंच्यते उक्तैर्यज्ञेषु
वर्धते ॥
(keep kalasha on top of rice pile)

ॐ इमं मे गंगे यमुने सरस्वती शुतुद्रिस्तोमं सचता परुष्ण्य ।
असिक्न्य मरुद्वृधे वितस्थयार्जीकीये श्रुणुह्या सुषोमय ॥
(fill kalasha with water)

गंधद्वारां धूरदर्शा नित्य पुष्पं करिषिणीं ।
ईश्वरिं सर्व भूतानां तामि होपह्वयेश्रियं ॥
(sprinkle in/apply ga.ndha to kalasha)

या फलिनीर्या अफला अपुष्पायाश्च पुष्पाणि ।
बृहस्पति प्रसोतास्थानो मंचत्वं हसः ॥
(put beetle nut in kalasha)

सहिरत्नानि दाशुषेसुवाति सविता भगः ।
तम्भागं चित्रमीमहे ॥
(put jewels / washed coin in kalasha)

हिरण्यरूपः हिरण्य सन्द्रिग्पान्न पात्स्येदु हिरण्य वर्णः ।
हिरण्ययात् परियोनेर्निषद्या हिरण्यदाददत्थ्यन्नमस्मै ॥
(put gold / daxina in kalasha)

कान्डात् कान्डात् परोहंति परुषः पारुषः परि एवानो दूर्वे
प्रतनु सहस्रेण शतेन च ॥
(put duurva / karika )

ॐ अश्वत्थेवो निशदनं पर्णेवो वसतिश्कृत ।
गो भाज इत्किला सथयत्स नवथ पूरुषं ॥
(put five leaves in kalasha)

युवासुवासा परीवीतागत् स उश्रेयान् भवति जायमानः ।
तं धीरासः कावयः उन्नयंति स्वाद्ध्यो स्वाद्ध्यो मनसा देवयंतः॥
(tie cloth for kalasha)

ॐ पूर्णादर्वि परापत सुपूर्णा पुनरापठ ।
वस्नेव विक्रीणावः इषमूर्जं शतकृतो ॥
(copper plate and ashhTadala with ku.nkuM)

इति कलशं प्रतिष्ठापयामि ॥
सकल पूजार्थे अक्षतान् समर्पयामि ॥

12 VARUNA PRARTANA
( On the second kalasha)

तत्वायामि शुनः शेपोः वरुण त्रिष्टुप् कलशे
वरुणावाहने विनियोगः ॥

तत्वायामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः ।
आहेलमानो वरुणः बोध्यरुशं समान आयुः प्रमोषिः ॥

ॐ भूर्भुवःस्वः वरुणाय नमः ।
चंदनं समर्पयामि ॥
(add to kalasha)
ॐ भूर्भुवःस्वः । वरुणाय नमः ।
अक्षतान् समर्पयामि ॥
(add to kalasha)
ॐ भूर्भुवःस्वः । वरुणाय नमः ।
हरिद्रा कुंकुमं समर्पयामि ॥
ॐ भूर्भुवःस्वः । वरुणाय नमः ।
धूपं समर्पयामि ॥
ॐ भूर्भुवःस्वः । वरुणाय नमः ।
दीपं समर्पयामि ॥
ॐ भूर्भुवःस्वः । वरुणाय नमः ।
नैवेद्यं समर्पयामि ॥
ॐ भूर्भुवःस्वः । वरुणाय नमः ।
सकल राजोपचारार्थे अक्षतान् समर्पयामि ॥

अवते हेळो वरुण नमोभिरव यज्ञेभिरीमहे हविर्भिः ।
क्षयं नमस्मभ्यं सुरप्रचेता राजन्नेनाम्सि शिश्रथः कृतानि ॥
वरुणाय नमः । मन्त्र पुष्पं समर्पयामि ॥
प्रदक्षिणा नमस्कारान् समर्पयामि ॥

अनया पूजया भगवान् श्री महा वरुण प्रीयताम् ॥
सकल पूजार्थे अक्षतान् समर्पयामि ॥

13 KALASHA PUUJANA
(continue with second kalasha )

कलशस्य मुखे विष्णुः कंठे रुद्रः समाश्रितः ।
मूले तत्र स्थितो ब्रह्म मध्ये मातृगणाः स्मृताः ॥
कुक्षौतु सागराः सर्वे सप्त द्वीपा वसुंधराः ।
ऋग्वेदोथ यजुर्वेदः सामवेदोह्यथर्वणः ॥
अंगैश्च सहिताः सर्वे कलशांतु समाश्रिताः ।
अत्र गायत्री सावित्री शांति पुष्टिकरी तथा ॥

आयान्तु देव पूजार्थ अभिषेकार्थ सिद्धये ॥

सितासिते सरिते यत्र संगथे तत्राप्लुतासो दिवमुत्पतंति ।
ये वैतन्वं विस्रजन्ति धीरास्ते जनासो अमृतत्त्वं भजन्ति ॥

॥ कलशः प्रार्थनाः ॥

कलशः कीर्तिमायुष्यं प्रज्ञां मेधां श्रियं बलं ।
योग्यतां पापहानिं च पुण्यं वृद्धिं च साधयेत् ॥
सर्व तीर्थमयो यस्मात् सर्व देवमयो यतः ।
अथः हरिप्रियोसि त्वं पूर्णकुंभं नमोऽस्तुते ॥

कलशदेवताभ्यो नमः ।
सकल पूजार्थे अक्षतान् समर्पयामि ॥

॥ मुद्रा ॥
(Show mudras as you chant )

निर्वीषि करणार्थे तार्क्ष मुद्रा ।
अमृति करणार्थे धेनु मुद्रा ।
पवित्री करणार्थे शंख मुद्रा ।
संरक्षणार्थे चक्र मुद्रा ।
विपुलमाया करणार्थे मेरु मुद्रा ।

14 SHANKHA PUUJAN
( pour water from kalasha to sha.nkha, add ga.ndha, flower)

शंखं चंद्रार्क दैवतं मध्ये वरुण देवतां ।
पृष्ठे प्रजापतिं विंद्याद् अग्रे गंगा सरस्वतीं ॥
त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करे ।
नमितः सर्व देवैश्च पांचजन्यं नमोऽस्तुते ॥

पांचजन्याय विद्महे । पावमानाय धीमहि ।
तन्नो शंखः प्रचोदयात् ॥

शंख देवताभ्यो नमः ।
सकल पूजार्थे अक्षतान् समर्पयामि॥

15 GANTARCHANA
(pour drops of water from sha.nkha on top of the bell, apply ga.ndha, flower)

आगमार्थन्तु देवानां गमनार्थन्तु रक्षसां ।
कुरु घंटारवं तत्र देवतावाहन लांछनं ॥
ज्ञानथोऽज्ञानतोवापि कांस्य घंटान् नवादयेत् ।
राक्षसानां पिशाचनां तद्देशे वसतिर्भवेत् ।
तस्मात् सर्व प्रयत्नेन घंटानादं प्रकारयेत् ।

घंट देवताभ्यो नमः ।
सकल पूजार्थे अक्षतान् समर्पयामि ॥

(Ring the gha.nTaa)

16 ATMA-SHUDDHI
( Sprinkle water from sha.nkha, on puja items and devotees)

अपवित्रो पवित्रो वा सर्व अवस्थांगतोपि वा ।
यः स्मरेत् पुंडरीकाक्षं सः बाह्याभ्यंतरः शुचिः ॥

17 SHAT-PATRA PUUJA
( put tulasi leaves or axatAs in empty vessels)

वायव्ये अर्घ्यं ।
नैऋत्य पाद्यं ।
ईशान्ये आचमनीयं ।
आग्नेये मधुपर्कं ।
पूर्वे स्नानियं ।
पश्चिमे पुनराचमनं ।

18 PANCHAMRITA PUUJA
( put tulasi leaves or axataas in vessels )

क्षीरे गोविन्दाय नमः । (keep milk in the centre)
दधिनि वामनाय नमः । (curd facing east )
घृते विष्णवे नमः । (Ghee to the south)
मधुनि मधुसूधनाय नमः । ( Honey to west )
शर्करायां अच्युथाय देवेभ्यो नमः । ( Sugar to north)

19 DWARA-PALAKA PUUJA

पूर्वद्वारे द्वारश्रियै नमः । वसुदेवाय नमः ॥
दक्षिणद्वारे द्वारश्रियै नमः । देवक्यै नमः ॥
पश्चिमद्वारे द्वारश्रियै नमः । नन्दाय नमः ॥
उत्तरद्वारे द्वारश्रियै नमः । यशोधाय नमः ॥

मध्ये नव रत्नखचित दिव्य सिंहासनस्योपरि
श्री बालकृष्णाय नमः ॥

द्वारपालक पूजां समर्पयामि ॥

20 PIITA PUUJA

पीठास्य अधोभागे, आधार शक्त्यै नमः, कूर्माय नमः
दक्षिने क्षीरोदधिये नमः, सिंहाय नमः
सिंहासनस्य आग्नेय कोणे, वराहाय नमः
नैऋत्य कोणे ज्ञानाय नमः
वायव्य कोणे वैराग्याय नमः
ईशान्य कोणे ऐश्वर्याय नमः
पूर्व दिशे धर्माय नमः
दक्षिन दिशे ज्ञानाय नमः,
पश्चिम दिशे अवैराग्याय नमः,
उत्तर दिशे अनैश्वर्याय नमः,
पीठ मद्ध्ये मूलाय नमः,
नालाय नमः,
पत्रेभ्यो नमः,
केसरेभ्यो नमः,
कर्णिकायै नमः
कर्णिका मद्ध्ये सं सत्त्वाय नमः,
रं रजसे नमः,
तं तमसे नमः,

सूर्यमण्डलाय नमः,
सूर्यमण्डलाधिपतये ब्रह्मणे नमः
सोममण्डलाय नमः,
सोममण्डलाधिपतये विष्णवे नमः
वह्निमण्डलाय नमः,
वह्निमण्डलाधिपतये ईश्वराय नमः

श्री बालकृष्ण स्वामिने नमः । पीठ पूजां समर्पयामि

21 DIKPALAKA PUUJA
(Start from east of kalasha or deity)

इंद्राय नमः,
अग्नये नमः,
यमाय नमः,
नैऋतये नमः,
वरुणाय नमः,
वायव्ये नमः,
कुबेराय नमः,
ईशानाय नमः,

इति दिग्पालक पूजां समर्पयामि

22 PRANA PRATISHTA
(hold flowers/axata in hand)

ध्यायेत् सत्यम् गुणातीतं, गुनत्रय समन्वितम्
लोकनाथं त्रिलोकेशं, कौस्तुभाभरनं हरिम्
नीलवर्णं पीतवासं, श्रीवत्स पदभुषितम्
गोकुलानन्दम् ब्रह्माध्यैरपि पूजितम्

(hold flowers/axataa in hand)
ॐ अस्य श्री कृष्णाय प्राण प्रतिष्ठापन महा
मंत्रस्य, ब्रह्मा, विष्णु, महेश्वरा ऋषयः,
ऋग्यजुर्सामाथर्वाणि छन्दांसि, परा प्राण, शक्तिः देवता,
ह्रां बीजं, ह्रीं शक्तिः, क्रों कीलकं, अस्यां मूर्तौ
प्राण प्रतिष्ठापने विनियोगः।

करन्यासः:

ह्रां अंगुष्ठाभ्यां नमः, ह्रीं तर्जनीभ्यां नमः,
ह्रूं मध्यमाभ्यां नमः, ह्रैं अनामिकाभ्यां नमः,
ह्रौं कनिष्ठिकाभ्यां नमः, ह्रः करतलकरपृष्ठाभ्यां
नमः

अङ्गन्यासः:

ह्रां हृदयाय नमः, ह्रीं शिरसे स्वाह, ह्रूं शिखायै
वौषट्, ह्रैं कवचाय हुं, ह्रौं नेत्रत्रयायवौशट्, ह्रः
अस्त्राय फट्, भूर्भुवस्वरों

असुनीते पुनरस्मासु चक्षुवः, पुनर्प्राणमिहीनो
देहिभोगं, जोक्षक्षेम सूर्यमुच्चरन्तं मनुमते,
मृडयान, स्वस्ति प्राणं प्रतिष्ठापयामि

(offer the flowers, axatas and prayers)

23 DHYANA

ॐ ॐ ( repeat 15 times)

तमद्भुतं बालकमबुजेक्षणम्,
चतुर्भुज शंख गदाद्युधायुदम्
श्री वत्स्य लक्ष्म्यं गल शोभि कौस्तुभं,
पीतम्बरम् सान्द्र पयोद सौभगं

महार्य वैदूर्य किरीटकुन्डल त्विशा परिष्वक्त सहस्रकुन्तलम्
उद्धम कांचनगदा कन्कणादिभिर् विरोचमानं वसुदेव ऐक्षत

ध्यायेत् चतुर्भुजं कृष्णं, शन्ख चक्र गदाधरम्
पीतम्बरधरं देवं माला कौस्तुभभूशितम्

क्लीं कृष्णाय नमः ।ध्यानम् समर्पयामि ॥

(you can add more related shlokas)

24 AWAHANA (hold flowers in hand)

आऊं सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमिं विश्वतो वृत्वा अत्यतिष्ठद्दशाङ्गुलम् ॥

आगच्छ देव देवेश, तेजोराशे जगत्पते,
क्रिय मानाम् मया पूजम्, ग्रहान सुरसत्तमे

आवाहयामि देव त्वां वसुदेव कुलोद्भवम्
प्रतिमायां सुवर्णादिनिर्मितायां यथाविधि

कृष्णम् च बलबध्रं च वसुदेवं च देवकीम्
नन्दगोप यशोधाम् च सुभद्राम् तत्र पूजयेत्

ॐ आत्मा देवानाम् भुवनस्य गर्भो यथा वशम् चरति देव ईशः
घोशा इदस्य शृण्विरेन रूपम् तस्मै वाताय हविशा विदेम

श्री क्लीं कृष्णाय नमः, स परिवारा सहित,
श्री बालकृष्णं आवाहयामि ॥

(offer flowers to Lord)

आवाहितो भव ।स्थापितो भव ।सन्निहितो भव ।
सन्निरुद्धो भव ।अवकुंठिथो भव ।सुप्रीतो भव ।
सुप्रसन्नो भव ।सुमुखो भव ।वरदो भव ।
प्रसीद प्रसीद ॥
(show mudras to Lord)

25 ASANAM

पुरुष एवेदगं सर्वम् यद्भूतं यच्छ भव्यम् ।
उतामृतत्वस्येशानः यदन्नेनातिरोहति ॥

राजधिराज राजेन्द्र कृष्ण महीपते
रत्न सिंहासनं तुभ्यं दास्यामि स्वीकुरु प्रभो

श्री बालकृष्णाय नमः, आसनं समर्पयामि ॥

(offer flowers/axathaas)

तां म आवह जातवेदो लक्ष्मी मनपगामिनीम् ।
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम्

26 PADYAM

एतावानस्य महिमा अतो ज्यायागंश्च पूरुषः ।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥

अच्युतानन्द गोविन्द प्रणतार्ति विनाशन् ।
पाहि मां पुन्डरीकाक्ष प्रसीद पुरुषोत्तम ॥

क्लीं बालकृष्णाय नमः, पादोयो पाद्यम् समर्पयामि ॥

अश्वपूर्वां रथमध्यां हस्तिनादप्रमोदिनीम् ।
श्रियं देवीमुपह्वये श्रीर्मा देवी जुषताम् ॥

पादोयो पाद्यं समर्पयामि ॥

27 ARGHYAM (offer water)

त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवात्पुनः ।
ततो विश्वङ्व्यक्रामत् साशनानशने अभि ॥४॥

परिपूर्ण परानन्द नमो नमो कृष्णाय वेधसे ।
गृहाणार्घ्यम् मया दत्तम् कृष्णा विष्णोर्जनार्दन ॥

श्री कृष्णाय नमः ।पादोयो पाद्यं समर्पयामि ॥

कांसोस्मि तां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम् ।
पद्मेस्थितां पद्मवर्णां तामिहोपह्वये श्रियम् ॥

28 ACHAMANIIYAM
(offer water, or akshatA/ leave/flower )

तस्माद्विराडजायत विराजो अधि पूरुषः ।
स जातो अत्यतिच्यत पश्चाद्भूमितथो पुरः ॥

नमः सत्याय शुद्धाय नित्याय ज्ञान रूपिणे ।
ग्रहाणाचमनं कृष्ण सर्व लोकैक नायक ॥

क्लीं बालकृष्णाय नमः, आचमनीयं समर्पयामि ॥

चन्द्रां प्रभासां यशसा ज्वलंतीं श्रियं लोके देवजुष्टामुदाराम् ।
तां पद्मिनीमीं शरणमहं प्रपद्येऽलक्ष्मीर्मे
नश्यतां त्वां वृणे ॥

आचमनीयं समर्पयामि ॥

29 SNANAM

यत्पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसन्तो अस्यासीदाज्यम् ग्रीष्म इध्मश्शरद्धविः ॥

ब्रह्माण्डोदर मध्यस्थैस्तिथैश्च रघुनन्दन
स्नापयिश्याम्यहं भक्त्या त्वं गृहाण जनार्दना

श्री बालकृष्णाय नमः, मलापकर्श स्नानं समर्पयामि ॥

आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः ।
तस्य फलानि तपसानुदन्तुमायान्तरायाश्च बाह्या अलक्ष्मीः ॥

29 a) PanchAmrita Snanam:

29 a.1 Paya snAnam (milk bath)

ॐ आप्याय स्व स्वसमेतुते
विश्वतः सोमवृष्ण्यं भवावाजस्य सगन्धे ॥

सुरभेस्तु समुत्पन्नं, देवानामपि दुर्लभम्
पयो दधामि देवेश, स्नानार्थम् प्रतिगृह्यताम्

श्री बालकृष्णाय नमः, पयः स्नानं समर्पयामि।
पयः स्नानानंतर शुद्धोदक स्नानं समर्पयामि।
सकल पूजार्थे अक्षतान् समर्पयामि ॥

29 a. 2 Dadhi snAnAM (curd bath)

दधिक्रावणो अकारिषं जिष्णोरश्वस्यवाजिनः ।
सुरभिनो मुखाकरत् प्रण आयुंषितारिषत्॥

चन्द्र मन्दल सम्काशम्, सर्व देव प्रियम् हि यत्,
धधि ददामि देवेश, स्नान अर्तम् प्रति ग्रिह्यताम्

श्री बालकृष्णाय नमः, दधि स्नानं समर्पयामि।
दधि स्नानानंतर शुद्धोदक स्नानं समर्पयामि।
सकल पूजार्थे अक्षतान् समर्पयामि

29 a. 3 Ghrata snAnam (Ghee bath)

घृतं मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतंवस्यधाम
अनुष्ठधमावह मादयस्व स्वाहाकृतं वृषभ वक्षिहव्यं ॥

आज्यम् सुरानाम् आहारम् आज्यम् यज्नेय् प्रतिश्ति तम्
आज्यम् पवित्रम् परमम् स्नान अर्ताम् प्रतिग्रह्य ता

श्री बालकृष्णाय नमः, घृत स्नानं समर्पयामि।
घृत स्नानानंतर शुद्धोदक स्नानं समर्पयामि।
सकल पूजार्थे अक्षतान् समर्पयामि ॥

29 a 4 Madhu snAnam (Honey bath)

ॐ मधुवात ऋतायथे मधुक्षरंति सिन्धवः माध्विनः
संतोष्वधीः
मधुनक्त मुथोशसो मधुमत्वार्थिवं रजः मधुद्यौ रस्तुनः पित
मधुमान्नो वनस्पतिर्मधुमां अस्तु सूर्यः माध्वीर्गावो भवंतुनः ॥

सर्वौषधि समुत्पन्नं पीयुष सदृशं मधु,
स्नानर्तन्ते मया दत्तं गृहाण परमेश्वर

श्री बालकृष्णाय नमः, मधु स्नानं समर्पयामि।
मधु स्नानानंतर शुद्धोदक स्नानं समर्पयामि।
सकल पूजार्थे अक्षतान् समर्पयामि ॥

29 a) 5 SharkarA snAnam (Sugar bath)

स्वाधुः पवस्य दिव्याय जन्मने स्वाधुदरिन्द्राय सुहवीतु नाम्ने
स्वादुर्मित्राय वरुणाय वयवे बृहस्पतये मधुमा अदाभ्यः ॥

इक्षु दन्डात् समुत्पन्न, रस्यस्निग्ध तरा शुभा
शर्करेयम् मया दत्ता, स्नानार्तम् प्रतिगृह्यताम्

श्री बालकृष्णाय नमः, शर्करा स्नानं समर्पयामि।
शर्करा स्नानानंतर शुद्धोदक स्नानं समर्पयामि।
सकल पूजार्थे अक्षतान् समर्पयामि ॥

29 b). gandhodaka snAna (Sandlewuud water bath)

गंधद्वारां दुराधर्शा नित्य पुष्पां करीषिणीं ।
ईश्वरीं सर्व भूतानां तामि होप व्हयेश्रियं ॥

हरि चंदन संभूतं हरि प्रीतेश्च गौरवात् ।
सुरभि प्रिय गोविन्द गंध स्नानाय गृह्यतां ॥

श्री बालकृष्णाय नमः ।गंधोदक स्नानं समर्पयामि।
सकल पूजार्थे अक्षतान् समर्पयामि ॥

29 c) abhyanga snAnam (Perfumed Oil bath)

कनिक्रदज्वनुशं प्रभ्रुवान।इयथिर्वाचमरितेव नावं ।
सुमंगलश्च शकुने भवासि मात्वा काचिदभिभाविश्व्या विदत ॥

अभ्यंगार्थ महीपाल तैलं पुष्पादि संभवं ।
सुगंध द्रव्य संमिश्रं संग्रहाण जगत्पते ॥

श्री बालकृष्णाय नमः, अभ्यंग स्नानं समर्पयामि।
सकल पूजार्थे अक्षतान् समर्पयामि ॥

29 d) a.ngodvartanakaM (To clean the body)

अंगोद्वर्तनकं देव कस्तूर्यादि विमिश्रितं ।
लेपनार्थं गृहाणेदं हरिद्रा कुंकुमैर्युतं ॥

श्री बालकृष्णायनमः, अंगोद्वर्तनकं समर्पयामि।
सकल पूजार्थे अक्षतान् समर्पयामि ॥

29 e) ushnodaka snAnam (Hot water bath)

नाना तीर्थादाहृतं च तोयमुष्णं मयाकृतं ।
स्नानार्थं च प्रयच्छामि स्वीकुरुश्व दयानिधे ॥

श्री बालकृष्णाय नमः। ऊष्णोदक स्नानं समर्पयामि।
सकल पूजार्थे अक्षतान् समर्पयामि ॥

29 f) Shuddodaka Snaanam
(Pure water bath, sprinkle water all around)

ॐ आपोहिष्टा मयो भुवः ।तान ऊर्जे दधातन ।
महेरणाय चक्षसे ।योवः शिवतमोरसः तस्यभाजयते हनः ।
उशतीरिव मातरः ।तस्मा अरंगमामवो ।यस्य क्षयाय जिन्वथ ।
आपो जन यथाचनः ॥

श्री बालकृष्णाय नमः। शुद्धोदक स्नानं समर्पयामि।
सकल पूजार्थे अक्षतान् समर्पयामि ॥

(after sprinkling water around , throw one tulasi leaf to the north)

30 MAHA ABHISHEKAH:
( Sound the bell, pour water from kalasha)

30 .a)Purusha Suukta:

॥ अथ पुरुषसूक्तम् ॥

आऊं सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमिं विश्वतो वृत्वा अत्यतिष्ठद्दशाङ्गुलम् ॥ १॥

पुरुष एवेदगं सर्वम् यद्भूतं यच्छ भव्यम् ।
उतामृतत्वस्येशानः यदन्नेनातिरोहति ॥ २॥

एतावानस्य महिमा अतो ज्यायागंश्च पूरुषः ।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥ ३॥

त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवात्पुनः ।
ततो विश्वङ्व्यक्रामत् साशनानशने अभि ॥ ४॥

तस्माद्विराडजायत विराजो अधि पूरुषः ।
स जातो अत्यतिच्यत पश्चाद्भूमितथो पुरः ॥ ५॥

यत्पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसन्तो अस्यासीदाज्यम् ग्रीष्म इध्मश्शरद्धविः ॥ ६॥

सप्तास्यासन् परिधयः त्रिस्सप्त समिधः कृताः ।
देवा यद्यज्ञं तन्वानाः अबध्नन्पुरुषं पशुम् ।
तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः ।
तेन देवा अयजन्त साध्या ऋषयश्च ये ॥ ७॥

तस्माद्यज्ञात्सर्वहुतः संभृतं पृषदाज्यम् ।
पशूगँस्तागंश्चक्रे वायव्यान् आरण्यान् ग्राम्याश्चये ॥ ८॥

तस्माद्यज्ञात्सर्वहुतः ऋचः सामानि जज्ञिरे ।
छन्दाँगसि जज्ञिरे तस्मात् यजुस्तस्मादजायत ॥ ९॥

तस्मादश्वा अजायन्त ये के चोभयादतः ।
गावो ह जज्ञिरे तस्मात् तस्माज्जाता अजावयः ॥ १०॥

यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् ।
मुखं किमस्य कौ बाहू कावूरू पादावुच्येते ॥ ११॥

ब्राह्मणोस्य मुखमासीत् बाहू राजन्यः कृतः ।
उरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥ १२॥

चंद्रमा मनसो जातः चक्षोः सूर्यो अजायत ।
मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत ॥ १३॥

नाभ्या आसीदन्तरिक्षम् शीर्ष्णो द्यौः समवर्तत ।
पद्भ्यां भूमिर्दिशः श्रोत्रात् तथा लोकांग अकल्पयन् ॥ १४॥

वेदाहमेतं पुरुषं महान्तम्
आदित्यवर्णं तमसस्तु पारे ।
सर्वाणि रूपाणि विचित्य धीरः

नामानि कृत्वाऽभिवदन् यदास्ते ॥१५॥

धाता पुरस्ताद्यमुदाजहार
शक्रः प्रविद्वान्प्रदिशश्चतस्त्रः ।
तमेवं विद्यानमृत इह भवति
नान्यः पन्था अयनाय विद्यते ॥१६॥

यज्ञेन यज्ञमयजन्त देवाः
तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्ते
यत्र पूर्वे साध्याः सन्ति देवाः ॥१७॥

श्री बालकृष्णायनमः ।पुरुषसूक्त स्नानं समर्पयामि।॥

30 b) shrii suukta:

हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो ममावह ॥१॥
तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ॥ २ ॥
अश्वपूर्वां रथमध्यां हस्तिनादप्रमोदिनीम् ।
श्रियं देवीमुपह्वये श्रीर्मा देवी जुषताम् ॥ ३ ॥
कांसोस्मि तां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम् ।
पद्मेस्थितां पद्मवर्णां तामिहोपह्वये श्रियम् ॥ ४ ॥
चन्द्रां प्रभासां यशसा ज्वलंतीं श्रियं लोके देवजुष्टामुदाराम् ।
तां पद्मिनीमीं शरणमहं प्रपद्येऽलक्ष्मीर्मे नश्यतां त्वां वृणे ॥ ५ ॥
आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः ।
तस्य फलानि तपसानुदन्तुमायान्तरायाश्च बाह्या अलक्ष्मीः ॥ ६ ॥
उपैतु मां देवसखः कीर्तिश्च मणिना सह ।
प्रादुर्भूतोऽस्मि राष्ट्रेस्मिन्कीर्तिमृद्धिं ददातु मे ॥ ७ ॥
क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम् ।
अभूतिमसमृद्धिं च सर्वां निर्णुदमे गृहात् ॥ ८ ॥
गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥ ९ ॥
मनसः काममाकूतिं वाचः सत्यमशीमहि ।
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ॥१० ॥
कर्दमेन प्रजाभूतामयि सम्भवकर्दम ।
श्रियं वासय मे कुले मातरं पद्ममालिनीम् ॥११ ॥
आपः सृजन्तु स्निग्धानि चिक्लीतवसमे गृहे ।
निचदेवीं मातरं श्रियं वासय मे कुले ॥१२ ॥
आर्द्रां पुष्करिणीं पुष्टिं सुवर्णां हेममालिनीम् ।
सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥१३ ॥
आर्द्रां यःकरिणीं यष्टिं पिङ्गलां पद्ममालिनीम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥१४ ॥
तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं प्रभूतं गावोदास्योश्वान्विन्देयं पुरुषानहम् ॥१५ ॥
यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम् ।
सूक्तं पञ्चदशर्चं च श्रीकामः सततं जपेत् ॥१६ ॥
पद्मानने पद्म ऊरू पद्माक्षी पद्मसम्भवे ।
तन्मेभजसि पद्माक्षी येन सौख्यं लभाम्यहम् ॥१७ ॥
अश्वदायी गोदायी धनदायी महाधने ।
धनं मे जुषतां देवि सर्वकामांश्च देहि मे ॥१८ ॥
पद्मानने पद्मविपद्मपत्रे पद्मप्रिये पद्मदलायताक्षि ।
विश्वप्रिये विश्वमनोनुकूले त्वत्पादपद्मं मयि संनिधत्स्व ॥१९ ॥
पुत्रपौत्रं धनं धान्यं हस्त्यश्वादिगवेरथम् ।
प्रजानां भवसि माता आयुष्मन्तं करोतु मे ॥ २० ॥
धनमग्निर्धनं वायुर्धनं सूर्यो धनं वसुः ।
धनमिन्द्रो बृहस्पतिर्वरुणं धनमस्तु ते ॥ २१ ॥
वैनतेय सोमं पिब सोमं पिबतु वृत्रहा ।
सोमं धनस्य सोमिनो मह्यं ददातु सोमिनः ॥ २३ ॥
न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः । ।
भवन्ति कृतपुण्यानां भक्तानां श्रीसूक्तं जपेत् ॥ २४ ॥
सरसिजनिलये सरोजहस्ते धवलतरांशुकगन्धमाल्यशोभे ।
भगवति हरिवल्लभे मनोज्ञे त्रिभुवनभूतिकरि प्रसीद मह्यम् ॥ २५ ॥
विष्णुपत्नीं क्षमादेवीं माधवीं माधवप्रियाम् ।
लक्ष्मीं प्रियसखीं देवीं नमाम्यच्युतवल्लभाम् ॥ २६ ॥
महालक्ष्मी च विद्महे विष्णुपत्नी च धीमहि ।
तन्नो लक्ष्मीः प्रचोदयात् ॥ २७ ॥
श्रीवर्चस्वमायुष्यमारोग्यमाविधाच्छोभमानं महीयते ।
धान्यं धनं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः ॥ २८ ॥

श्री बालकृष्णायनमः, श्री सूक्त स्नानम् समर्पयामि।

30 c) Vishnu Suukta:

अतो देवा अवन्तुनो यतो विष्णुर्विचक्र मे
प्रत्विव्या सप्तधामभिः, इदम् विष्णुर्विचक्रमे
त्रेधा निदधे पदं, समूढ्मस्यपाम्सुरे
त्रीणि त्रीणि पदा विचक्रमे, विष्णुर्गोपादाभ्यः
अतो धर्मानेधारयन्, विश्नोह कर्माणिपश्यतयेतो व्रतानि पस्पशे
इन्द्रस्य यज्ञः सखा, तद् विष्णोः परमं पदं सदा पश्यन्ति सूरयः
दिवीव चक्षुराततम् तद्विप्रासो विपन्यवो जाग्रवांसह समिन्धते
विष्णोर्यत्र रमं पधं
देवश्य त्वा सवितुः प्रसवेश्विनोर्भाहुभ्यां पूष्णो हस्ताभ्याम्
अग्नेय्स्तेजसा, सूर्यश्च अर्चसेन्द्रस्यं इन्द्रियेनाभिशिञ्चामि।

बलाय श्रियै यशसेन्नाध्याय अम्रुताभिशेको अस्तु
शान्तिः पुश्ठिः तुश्ठिः च अस्तु

श्री बालकृष्णायनमः ।मह् अभिशेक स्नानम् समर्पयामि ॥

31 PRATISHTAPANA

ॐ नमो कृष्णाय॥
(Repeat 12 times)

तदुस्तु मित्रा वरुणा तदग्ने सम्योरश्मभ्यमिदमे स्तुशस्तं ।
अशीमहि गाढमुत प्रतिष्ठां नमो दिवे ब्रहते साधनाय ॥
ग्रहावै प्रतिष्ठासूक्तं तत् प्रतिष्टित तमया वाचा ।
शं स्तव्यं तस्माद्यद्यपिदूर इव पशून् लभते ।
ग्रहानेवै नानाजिगमिशति ग्रहाहि पशूनां प्रतिष्ठा प्रतिष्ठा ॥

श्री बालकृष्णायसांगाय सपरिवाराय सायुधाय
सशक्तिकाय नमः ।
श्री बालकृष्णं सांगं सपरिवारं सायुधं सशक्तिकं
आवाहयामि ।
परिवार सहित श्री कृष्णायनमः।
सुप्रतिष्ठमस्तु ।

32 VASTRA
(offer two pieces of cloth for the Lord)

तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः ।
तेन देवा अयजन्त साध्या ऋषयश्च ये ॥
उपैतु मां देवसखः कीर्तिश्च मणिना सह ।
प्रादुर्भूतो सुरष्ट्रेस्मिन्कीर्तिम् वृद्धिं ददातु मे ॥

तप्त कान्चन सम्काशं पीताम्बरं इदं हरे
सम्गृहाण जगन्नात कृष्णा नमोस्तुते

श्री बालकृष्णायनमः, वस्त्रयुग्मं समर्पयामि

33 YAJNOPAVIITA

तस्माद्यज्ञात्सर्वहुतः संभृतं पृषदाज्यम् ।
पशूगँस्तागंश्चक्रे वायव्यान् आरण्यान् ग्राम्याश्चये ॥।

क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम् ।
अभूतिमसमृद्धिं च सर्वां निर्णुदमे गृहात् ॥

श्री बाल कृष्ण देवेश स्रिधरानन्त राघव
ब्रह्मसुत्रम्चोत्तरीयं गृहाण यदुनन्दन

श्री बालकृष्णायनमः, यज्ञोपवीतं समर्पयामि ॥

34 GANDHA

तस्माद्यज्ञात्सर्वहुतः ऋचः सामानि जज्ञिरे ।
छन्दाँगसि जज्ञिरे तस्मात् यजुस्तस्मादजायत ॥

गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥

कुम्कुमागरु कस्तूरि कर्पूरं चन्दनं तता
तुभ्यं दास्यामि राजेन्द्र श्री कृष्णा स्वीकुरु प्रभो

श्री बालकृष्णायनमः ।गंधं समर्पयामि ॥

35 HASTABHUUSHANA

श्री बालकृष्णायनमः ।हस्त भूशनम् समर्पयामि ॥

36 NANA PARIMALA DRAVYA

ॐ अहिरैव भोग्येः पर्येति बाहुं जाया हेतिं परिभादमानः ।
हस्तज्ञो विश्वावयुनानि विद्वान्पुमास्प्रमांसं परिपातु विश्वतः ॥

श्री बालकृष्णायनमः ।नाना परिमल द्रव्यं समर्पयामि ॥

37 AKSHATA

तस्मादश्वा अजायन्त ये के चोभयादतः ।
गावो ह जज्ञिरे तस्मात् तस्माज्जाता अजावयः ॥

मनसः काममाकूतिं वाचः सत्यमशीमहि ।
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ॥

श्वेत तुन्दल सम्युक्तान्, कुम्कुमेन विराजितान्
अक्षतान् गृह्यताम् देव, नारायण नमोस्तुते

श्री बालकृष्णायनमः ।अक्षतान् समर्पयामि ॥

## 38 PUSHPA

माल्यादीनि सुगन्धीनि, माल्यतादीनि वैप्रभो
मया ह्रितानि पूजर्थम्, पुश्पाणि प्रतिग्रह्यताम्

श्री बालकृष्णायनमः । पुष्पाणि समर्पयामि ॥

तुलसी कुन्द मन्दार, जाजी पुन्नाग चम्पकैः
कदम्ब करवीरैश्च कुसुमे शतपत्रकैः

जलाम्बुजैर्बिल्वपत्रैश्चम्पकै यादवं विभुम्
पूजयिश्याम्यहं भक्त्या सन्गृहाण जनार्दन

तुलसी कुन्द मन्दार पारिजाम्बुजैर्युतां
वनमालां प्रदास्यामि गृहाण जगदीश्वर

श्री बालकृष्णायनमः ।
पत्र पुष्पाणि,वनमालां च समर्पयामि ॥

## 39 NANA ALANKARA

कठि सूताङ्गुली येच कुन्ड्दले मुकुठम् तथ
वनमालां कौस्तुभं च गृहाण पुरुषोत्तम

श्री बालकृष्णायनमः । नाना अलन्कारान् समर्पयामि ॥

## 40 ATAH ANGAPUUJAH

श्री कृष्णाय नमः । पादौ पूजयामि ॥
रजीवलोचनाय नमः । गुल्फ़ौ पूजयामि ॥
ॐ नरकान्तकाय नमः । जानुनी पूजयामि ॥
वाचस्पतये नमः । जंघै पूजयामि ॥
विश्वरूपाय नमः । ऊरून् पूजयामि ॥

ॐ बलभद्रानुजाय नमः । गुह्यं पूजयामि ॥
विश्वमूर्तये नमः । जघनं पूजयामि ॥
गोपीजन प्रियाय नमः । कटिं पूजयामि ॥
ॐ परमात्मने नमः । उदरं पूजयामि ॥
श्रीकण्टाय नमः । हृदयं पूजयामि ॥

यज्ञिने नमः । पार्श्वौ पूजयामि ॥
त्रिविक्रमाय नमः । पृष्ठदेहं पूजयामि ॥
ॐ पद्मनाभाय नमः । स्कन्धौ पूजयामि ॥
सर्वास्त्रधारिणे नमः । बाहून् पूजयामि ॥

श्री बालकृष्णाय नमः सर्वांगाणि पूजयामि ॥

## 41 ATAH PUSHPA PUUJAH

श्री कृष्णाय नमः । करवीर पुष्पं समर्पयामि ॥
शुभद्राग्रजाय नमः । जाजी पुष्पं समर्पयामि ॥
शाश्वताय नमः । चम्पक पुष्पं समर्पयामि ॥
रजीवलोचनाय नमः । वकुल पुष्पं समर्पयामि ॥
श्रीमते नमः । शतपत्र पुष्पं समर्पयामि ॥
राजेन्द्राय नमः । कल्हार पुष्पं समर्पयामि ॥
यदुपुङ्गवाय नमः । सेवन्तिका पुष्पं समर्पयामि ॥
रुग्मिणीवल्लभाय नमः । मल्लिका पुष्पं समर्पयामि ॥
वेणुनादप्रियाय नमः । इरुवंतिका पुष्पं समर्पयामि ॥
जितामित्राय नमः । गिरिकर्णिका पुष्पं समर्पयामि ॥
जनार्दनाय नमः । आथसी पुष्पं समर्पयामि ॥
ॐ नन्दगोपप्रियाय नमः । पारिजात पुष्पं समर्पयामि ॥
दन्ताय नमः । पुन्नाग पुष्पं समर्पयामि ॥
वाग्मिने नमः । कुन्द पुष्पं समर्पयामि ॥
सत्यवाचे नमः । मालति पुष्पं समर्पयामि ॥
सत्यविक्रमाय नमः । केतकी पुष्पं समर्पयामि ॥
सत्यवृताय नमः । मन्दार पुष्पं समर्पयामि ॥
वृतधराय नमः । पातली पुष्पं समर्पयामि ॥
देवकीनन्दनाय नमः । अशोक पुष्पं समर्पयामि ॥
दुष्टध्वम्सिने नमः । पूग पुष्पं समर्पयामि ॥
ॐ नवनीत चोराय नमः । दादिमा पुष्पं समर्पयामि ॥
सकलगुण संपन्नाय नमः । देव दारु पुष्पं समर्पयामि ॥
ॐ पूतनान्तकाय नमः । सुगन्ध राज पुष्पं समर्पयामि ॥
वेदान्तसाराय नमः । कमल पुष्पं समर्पयामि ॥

श्री कृष्णाय नमः । पुष्पपूजं समर्पयामि ॥

## 42 ATA PATRA PUUJAH

श्री कृष्णाय नमः । तुलसी पत्रं समर्पयामि ॥
ॐ आदिपुरुशाय नमः । जाजी पत्रं समर्पयामि ॥
धन्विने नमः । चम्पका पत्रं समर्पयामि ॥
ॐ पित्रु भक्ताय नमः । बिल्व पत्रं समर्पयामि ॥
वरप्रदाय नमः । धुर्वायुग्मं समर्पयामि ॥
जितक्रोधाय नमः । सेवन्तिका पत्रं समर्पयामि ॥
जगद्गुरवे नमः । मरुग पत्रं समर्पयामि ॥
ॐ महादेवाय नमः । दवन पत्रं समर्पयामि ॥

ॐ महाभुजाय नमः । करवीर पत्रं समर्पयामि ॥
सौम्याय नमः । विश्नु क्रन्ति पत्रं समर्पयामि ॥
ॐ ब्रह्मण्याय नमः । माचि पत्रं समर्पयामि ॥
ॐ मुनिसंस्तुतये नमः । मल्लिका पत्रं समर्पयामि ॥
ॐ महायोगिने नमः । इरुवन्तिक पत्रं समर्पयामि ॥
ॐ महोदराय नमः । अपामर्ग पत्रं समर्पयामि ॥
ॐ परमपुरुशाय नमः । पारिजात पत्रं समर्पयामि ॥
ॐ पुण्योदयाय नमः । दादिम पत्रं समर्पयामि ॥
दयासागराय नमः । बदरी पत्रं समर्पयामि ॥
स्मितवक्त्राय नमः । देवदारु पत्रं समर्पयामि ॥
ॐ मितभषिणे नमः । शमी पत्रं समर्पयामि ॥
ॐ पूर्वभाषिणे नमः । आम्र पत्रं समर्पयामि ॥
यादवाय नमः । मन्दार पत्रं समर्पयामि ॥
यशोदवत्सलाय नमः । वत पत्रं समर्पयामि ॥
जितवाराशये नमः । कमल पत्रं समर्पयामि ॥
हरये नमः । वेनु पत्रं समर्पयामि ॥

कृष्णाय नमः । पत्रपूजं समर्पयामि

43 ASHTOTTARA PUUJA (Chant dhyAna shloka )
(if possible, chant sri vishNu sahsranAma )

कृष्णाय वसुदेवाय हरये परमात्मने ।
प्रणत क्लेशनाशाय गोविन्दाय नमो नमः ॥

श्री कृष्णाय नमः ।
कमलानाथाय नमः ।
वासुदेवाय नमः ।
सनातनाय नमः ।
वसुदेवात्मजाय नमः ।
ॐ पुण्याय नमः ।
लीलामानुषविग्रहाय नमः ।
श्रीवत्स कौस्तुभधराय नमः ।
यशोदावत्सलाय नमः ।
हरये नमः ।
चतुर्भुजात्त चक्रासि गदाशङ्खाध्युधाय नमः ।
देवकीनन्दनाय नमः ।
श्रीशाय नमः ।
ॐ नन्दगोपप्रियात्मजाय नमः ।
यमुनावेगसंहारिणे नमः ।
ॐ बलभद्रप्रियानुजाय नमः ।
ॐ पूतनाजीवितहराय नमः ।
शकतासुरभंजनाय नमः ।
ॐ नन्दव्रजजनानन्दिने नमः ।
सच्चिदानन्दविग्रहाय नमः ।
ॐ नवनीतविलिप्तांगाय नमः ।
ॐ नवनीतनटाय नमः ।
ॐ अनघाय नमः ।
ॐ नवनीतनवाहाराय नमः ।
ॐ मुचुकुन्दप्रसादकाय नमः ।
षोडशस्त्रीसहरेशाय नमः ।
त्रिभङ्गीमधुराकृतये नमः ।
शुकवागमृताब्धीन्दवे नमः ।
गोविन्दाय नमः ।
योगिनां पतये नमः ।
वत्सवाटचराय नमः ।
ॐ अनन्ताय नमः ।
धेनुकासुरमर्दनाय नमः ।
तृणीकृततृणावर्ताय नमः ।
यमलार्जुन भंजनाय नमः ।
ॐ उत्तालतालभेत्रे नमः ।
तमालश्यामलाकृतये नमः ।
गोपगोपीश्वराय नमः ।
योगिने नमः ।
कोटिसूर्यसमप्रभाय नमः ।
ॐ इलापतये नमः ।
ॐ परस्मैज्योतिषे नमः ।
यादवेन्द्राय नमः ।
यदुद्वहाय नमः ।
वनमालिने नमः ।
ॐ पीतवाससे नमः ।
ॐ पारिजातापहारकाय नमः ।
गोवर्धनाचलोध्दर्त्रे नमः ।
गोपालाय नमः ।
सर्वपालकाय नमः ।
ॐ अजाय नमः ।
ॐ निरंजनाय नमः ।
कामजनकाय नमः ।
कंजलोचनाय नमः ।
ॐ मधुघ्ने नमः ।
ॐ मधुरानाथाय नमः ।
द्वारकानायकाय नमः ।
ॐ बलिने नमः ।
वृदावनान्तसंचारिणे नमः ।
तुलसीदामभूषणाय नमः ।
स्यमन्तकमणेर्हर्त्रे नमः ।

ॐ नरनारायणात्मकाय नमः ।
कुब्जाकृ$^{i}\Psi ZAbrDrAy\ nm,$ .
ॐ मायिने नमः ।
ॐ परमपूरुषाय नमः ।
ॐ मुष्टिकासुरचाणूरमल्लयुध्द विशारदाय नमः ।
संसारवैरिणे नमः ।
कंसारये नमः ।
ॐ मुरारये नमः ।
ॐ नरकान्तकाय नमः ।
ॐ अनादिब्रह्मचारिणे नमः ।
कृष्णाव्यसनकर्शकाय नमः ।
शिशुपालशिरश्छेत्रे नमः ।
दुर्योधनकुलान्तकाय नमः ।
दुर्योधनकुलान्तकाय नमः ।
विदुराक्रूरवरदाय नमः ।
विश्वरूपप्रदर्शकाय नमः ।
सत्यवाचे नमः ।
सत्यसंकल्पाय नमः ।
सत्यभामारताय नमः ।
जयिने नमः ।
सुभद्रापूर्वजाय नमः ।
विष्णवे नमः ।
ॐ भीष्ममुक्तिप्रदायकाय नमः ।
जगद्गुरवे नमः ।
जगन्नाथाय नमः ।
वेणुनादविशारदाय नमः ।
वृषभासुरबिध्वंसिने नमः ।
ॐ बाणासुरकरान्तकाय नमः ।
युधिष्ठिर प्रतिष्ठात्रे नमः ।
ॐ बर्हिबर्हावतंसकाय नमः ।
ॐ पार्थसारथये नमः ।
ॐ अव्यक्ताय नमः ।
गीतामृतमहोदधये नमः ।
काळीयफणिमाणिक्यरंजितश्रीपदांबुजाय नमः ।
दामोदराय नमः ।
यज्ञभोक्त्रे नमः ।
दानवेन्द्रविनाशकाय नमः ।
ॐ नारायणाय नमः ।
ॐ परब्रह्मणे नमः ।
ॐ पन्नगाशन वाहनाय नमः ।
जलक्रोडासमासक्त गोपीवस्त्रापहारकाय नमः ।
ॐ पुण्यश्लोकाय नमः ।
तीर्थपादाय नमः ।
वेदवेद्याय नमः ।
दयानिधये नमः ।
सर्वभूतात्मकाय नमः ।
ॐ परात्पराय नमः ।

इति अष्टोत्तर पूजां समर्पयामि ॥

44 DHUUPAM

वनस्पत्युद्भवो दिव्यो गन्धद्यो गन्धवथ्थमः ।
कृष्णा महिपालो धूपोयं प्रतिगृह्यतां ॥

यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् ।
मुखं किमस्य कौ बाहू कावूरू पादावुच्येते ॥

श्री बालकृष्णाय नमः । धूपं अघ्रापयामि ॥

45 DIIPAM

साज्यं त्रिवर्ति सम्युक्तं वह्निना योजितुं मया
गृहाण मन्गालं दीपं, त्रैलोक्य तिमिरापहम्

ब्राह्मणोस्य मुखमासीत् बाहू राजन्यः कृतः ।
उरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥

श्री कृष्णायनमः । दीपं दर्शयामि ॥

46 NEIVEDYAM

(dip finger in water and draw a square
and 'shrii' mark inside the square.
Place naivedya on 'sri'. remove lid and sprinkle
water around the vessel; place in each food item
one washed leaf/flower/axatha)

कृष्णाय विद्महे बलभद्राय धीमहि ।
तन्नो विष्णु प्रचोदयात् ॥

ॐ नमः कृष्णाय॥
(show mudras)

निर्वीशिकरणार्थं तार्क्ष मुद्रा ।
आम्रति करणार्थं धेनु मुद्रा ।
पवित्रकरणार्थं शंख मुद्रा ।

संरक्षणार्थं चक्र मुद्रा ।
विपुलमाय करणार्थं मेरु मुद्रा ।

Touch naivedya and chant 9 times 'ॐ'

सत्यंतवर्तेन परिसिंचामि
(sprinkle water around the naivedya)

भोः! स्वामिन् भोजनार्थं आगश्चादि विज्ञाप्य
(request Lord to come for dinner)

सौवर्णे स्थालिवैर्ये मणिगणकचिते गोघृतां
सुपक्वां भक्ष्यां भोज्यांश लेह्यानपि
सकलमहं जोष्यम्न नीधाय नाना शाकै रूपेतं
समधु दधि घृतं क्षीर पानिय युक्तं
तांबूलं चापि श्री कृष्णं प्रतिदिवसमहं मनसे चिंतयामि

अद्य तिष्ठति यत्किंचित् कल्पितश्चापरंग्रहे
पक्वन्नं च पानीयं यथोपस्कर संयुतं
यथाकालं मनुष्यार्थे मोक्ष्यमानं शरीरिभिः
तत्सर्वं कृष्णपूजास्तु प्रयतां मे जनार्दन
सुधारसम् सुविफुलम् आपोषणमिदं
तव गृहाण कलशानीतं यथेष्टमुप भुज्ज्यतां ॥

श्री बालकृष्णाय नमः ।
अमृतोपस्तरणमसि स्वाहा ॥
(drop water from sha.nkha)

ॐ प्राणात्मने नारायणाय स्वाहा ।
ॐ आपानात्मने वासुदेवाय स्वाहा ।
व्यानात्मने सम्कर्षणाय स्वाहा ।
ॐ उदानात्मने प्रद्युम्नाय स्वाहा ।
समानात्मने अनिरुद्धाय स्वाहा ।

ॐ नमः कृष्णाय।

नैवेद्यं गृह्यतां देव भक्ति मे अचलां कुरुः ।
ईप्सितं मे वरं देहि इहत्र च परां गतिम् ॥

श्री कृष्ण नमस्तुभ्यं महा नैवेद्यं उत्तमं ।
सन्गृहाण सुरश्रेश्ठ भक्ति मुक्ति प्रदायकं ॥

चंद्रमा मनसो जातः चक्षोः सूर्यो अजायत ।
मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत ॥

आर्द्रां पुष्करिणीं पुष्टिं सुवर्णां हेममालिनीम् ।
सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥

श्री बालकृष्णाय नमः ।

नैवेद्यं समर्पयामि ॥

(cover face with cloth and chant gaayatri ma.ntra five times or repeat 12 times )
ॐ बालकृष्णाय नमः ।

सर्वत्र अमृतोपिधान्यमसि स्वाहा ।

श्री बालकृष्णाय नमः ।
उत्तरापोषणं समर्पयामि ॥

(Let flow water from sha.nkha)

47 MAHA PHALAM
(put tulsi/akshatA on a big fruit)

इदं फलं मयादेव स्थापितं पुरतस्थव ।
तेन मय् सफलावाप्तिर्भवेत् जन्मनिजन्मनि ॥

श्री बालकृष्णाय नमः । महफलं समर्पयामि ।

48 PHALASHTAKA
(put tulsi/akshatA on fruits)

कूश्मान्ड मातुलिन्गं च कर्कती दादिमी फलम्
रम्भा फलं जम्बीरं बदरं तता

श्री बालकृष्णाय नमः । फलाष्टकं समर्पयामि ॥

49 KARODWARTANA

करोद्वर्तन्कं देवमया दत्तं हि भक्तिथः ।
चारु चंद्र प्रभां दिव्यं गृहाण जगदीश्वर ॥

श्री बालकृष्णायनमः ।
करोद्वर्थनार्थे चंदनं समर्पयामि ॥

50 TAMBUULAM

पूगीफलं सतांबूलं  नागवल्ली दलैर्युतम् ।
ताम्बूलं गृह्यतां कृष्ण येल लवन्ग सम्युक्तम् ॥

श्री बालकृष्णायनमः ।पूगीफल ताम्बूलं समर्पयामि ॥

51 DAKSHINA

हिरण्य गर्भ गर्भस्थ हेमबीज विभावसोः ।
अनंत पुण्य फलदा अथः शांतिं  प्रयच्छामि ॥

श्री बालकृष्णायनमः । सुवर्ण पुष्प दक्षिणां समर्पयामि ॥

52 MAHA NIRAJANA

श्रीयै जातः श्रिय अनिरियाय श्रियं वयो जरित्रभ्यो ददाति
श्रियं वसाना अमृतत्त्व मायन् भवंति सत्या समिधा मितद्रौ
श्रिय येवैनं तच्छ्रिआ मादधाति संतत मृचा वशट्कृत्यं
संततमै संधीयते प्रजया पशुभिर्य येवं वेद ॥

श्री बालकृष्णायनमः ।महानीराजनं दीपं समर्पयामि ॥

53 KARPURA DIIPA

अर्चत प्ररिचत  प्रियमे दासो अर्चत ।
अर्चन्तु पुत्रका वता पुराण दृष्णवर्चत ॥

कर्पूरकं महाराज  रंभोद्भूतं च दीपकं ।
मंगलार्थं महीपाल   संगृहाण जगत्पते ॥

श्री बालकृष्णायनमः । कर्पूर दीपं समर्पयामि ॥

54 PRADAKSHINA

नाभ्या आसीदन्तरिक्षम् शीर्ष्णो द्यौः समवर्तत ।
पदभ्यां भूमिर्दिशः श्रोत्रात् तथा लोकांग अकल्पयन् ॥

आर्द्रां यःकरिणीं यष्टिं पिङ्गलां पद्ममालिनीम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥

यानि कानि च पापानि जन्मांतर कृतानि च ।
तानि तानि विनश्यन्ति  प्रदक्षिणे पदे पदे ॥

अन्यथा शरनं नास्ति, त्वमेव् शर्नं मम
तस्मात् कारुन्य भावेन रक्ष रख्स रमापते

श्री बालकृष्णायनमः । प्रदक्षिणान् समर्पयामि ॥

55 NAMASKARA

नमो ब्रह्मण्य देवाय गोब्राह्मणहिताय च ।
जगधिताय कृशणाय गोविन्दाय नमो नमः ॥

कृशणाय वासुदेवाय हरये परमात्मने ।
प्रणतक्लेशनाशाय गोविन्दाय नमो नमः ॥

नमस्तुभ्यम् जगन्नाथ देवकीतनय प्रभो
वसुदेवात्मजानन्थ यशोदानन्दवर्धन
गोविन्द गोकुलाधर गोपिकान्त नमोस्तुते

सप्तास्यासन् परिधयः त्रिस्सप्त समिधः कृताः ।
देवा यद्यज्ञं तन्वानाः अबध्नन्पुरुषं पशुम् ॥

तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं प्रभूतं गावोदास्योश्वान्विन्देयं पुरुषानहम् ॥

नमः ।सर्व हितार्ताय जगदार हेतवे
श्राश्तान्गोयं प्रनामस्ते प्रयत्नेन मय क्रितह्
उरुसा शिरसा द्रिश्त्वा, मनसा वचसा तता
पद्भयां कराभ्यां जानुभ्याम्, प्रनामोश्तान्ग मुच्यते

शात्येनापि नमस्कारान्, कुर्वतह् शर्ग्न पानये
शत जन्मार्चितं पापम्, तत् क्षनदेव नश्यति

श्री बालकृष्णायनमः ।नमस्कारान् समर्पयामि ॥

56 RAJOPACHARA

गृहाण परमेशान  सरत्ने छत्र चामरे ।
दर्पणं व्यजिनं चैव  राजभोगाय यत्नथः ॥

श्री बालकृष्णाय नमः । छत्रं समर्पयामि ।
श्री बालकृष्णाय नमः । चामरं समर्पयामि ।
श्री बालकृष्णाय नमः । गीतं समर्पयामि ।
श्री बालकृष्णाय नमः । नृत्यं समर्पयामि ।

श्री बालकृष्णाय नमः । वाद्यं समर्पयामि ।

श्री बालकृष्णाय नमः ।
समस्त राजोपचारार्थे अक्षतान् समर्पयामि ॥

57 MANTRA PUSHPA

यज्ञेन यज्ञमयजंत देवास्थानि धर्माणि प्रथमन्यासन् ।
तेहनाकं महिमानः सचंत् यत्र पूर्वे साद्य संति देवः ॥

यः शुशिः प्रयतोभूत्व जुहुयादाज्य मन्वहम् ।
सूक्तं पंच दशचं चा श्री कामः सततं जपेत् ॥
विद्या बुद्धि धनेश्वर्य पुत्र पौत्रादि संपदः ।
पुष्पांजलि प्रदानेन देहिमे ईप्सितं वरम् ॥

नमस्त्वनंताय सहस्र मूर्तये सहस्र पादाक्षि शिरोरु बाहवे ।
सहस्र नाम्ने पुरुषाय शाश्वते सहस्र कोटी युगधारिणे नमः ॥

ॐ नमो महद्भ्यो नमो अर्भकेभ्यो नाम्नो युवभ्यो नम आशिनेभ्यः
यजां देवान्य दिशक्रवा ममा जायसः शं समावृक्षिदेव ॥
ॐ ममत्तुनः परिज्ञावसरः ममत्तु वातो अपां व्रशन्वान्
शिशीतमिन्द्रा पर्वता युवन्नस्थन्नो विश्वेवरिवस्यन्तु देवाः ॥
कथात अग्ने शुचीयंत अयोर्ददाशुर्वाजे भिराशुशानः
उभेयत्तोकेतनये दधाना ऋतस्य सामनृणयंत देवाः ॥

यज्नेन यज्न मय जन्त देवास्तनि धर्मनि प्रतमन्यसन्,
तेह नाकं महिमानह सचन्त् यत्र पुर्वे साद्य सन्ति देवह

राजाधि राजाय , प्रसह्य साहिने , नमो वयं वैश्रवणाय
कूर्महे समे कामान् , काम कामाय मह्यं , कामेश्वरो
वैश्रवणो दधातु ,कुबेराय वैश्रवणाय महाराजाय नमः ॥

स्वस्ति , साम्राज्यं , भोज्यं , स्वाराज्यं , वैराज्यं ,
पारमेष्ठं राज्यं महाराज्यमाधिपत्यमयं समंत
पर्यायिस्यात् सार्व भौमः सार्वायुशः, अंताद ,
परर्धत् , पृथिव्यै समुद्र पर्यंतय एकरालिति तदप्येश
श्लोकोभिगीतो मरूतः , परिवेष्टारो मरुत्तस्या वसन् ग्रहे
आविक्षितास्य कामप्रेर्विश्वेदेवा सभासद इति ॥

श्री बालकृष्णायनमः । मंत्रपुष्पं समर्पयामि ॥

58 SHANKHA BRAMANA
(make three rounds of sha.nkha with water like aarati and pour down; chant OM 9 times and show mudras)

इमां आपशिवतम इमं सर्वस्य भेषजे ।
इमां राष्ट्रस्य वर्धिनि इमां राष्ट्र भ्रतोमत ॥

59 ARGHYA PRADAANAM

कुम्भ प्रार्थना

नमस्ते देवदेवेश नमस्ते धरणी धर ।
नमस्ते पद्मनाभाय सुधाकुम्भ नमोस्तुते ॥

ज्योत्स्नांपते नमस्तुभ्यं नमस्ते ज्योतिषांपते ।
नमस्ते रोहिणीकान्त सुधाकुम्भ नमोस्तुते ॥

अर्घ्य मंत्र

जात कंस वधार्थाय भूभारोत्तारणाय च ।
कौरवाणां विनाशाय दैत्यानां निधनाय च ।
पाण्डवानाम् हितार्थाय धर्म सम्स्थापनाय च ।
गृहाणार्घ्यं मयादत्तं देवक्या सहितो हरे ॥

देवकी सहित् श्री कृशणय इदम् अर्घ्यम् दत्तम् न मम

क्षीरोदार्णव सम्भूत अत्रिगोत्र समुद्भव
गृहाणार्घ्यं मयादत्तम् रोहिण्या सहितः शशिन्
रोहिनी सहित चन्द्राय इदम् अर्घ्यम् दत्तम् न मम

तिथे परम कल्याणि मातर्मंगलदायिनि
नक्षत्र तारके तुभ्यं ग्रहाणार्घ्यम् नमोस्तुते
नक्षत्र तारक सहित तिथय इदमर्घ्यम् दत्तम् न मम

प्रार्थनाः

कृष्णं च बलभद्रं च वसुदेवं च देवकीं ।
नन्दगोपं यशोदां च सुभद्रां तत्र पूजयेत् ॥

अद्य स्तित्व निराहारः श्वोभुते परमेश्वर
भोक्ष्यामि पुन्डरीकाक्ष अस्मिन् जन्माष्टमी व्रते

मन्त्रहीनं, क्रियाहीनं, भक्तिहीनं जनार्दन
यत्पूजितं मया देव परिपूर्नं तदस्तु मेय्

यस्य स्म्रित्या च नाम्नोक्त्य, तपह्, पूज, क्रियादिशु
नूनं सम्पूर्नतां याति सद्यो वन्देय् तमच्युतम्

क्लीं कृष्णाय नमः ।प्रार्थनां समर्पयामि ॥

## 60 TIRTA PRASHANA

श्रियः कान्ताय कल्याण निधये निधयेर्तिनाम् ।
श्री वेंकट निवासाय, श्रीनिवासाय मंगलम् ॥

सर्वदा सर्व कार्येषु, नास्ति तेषां अमंगलम् ।
येषां हृदयिस्थो भगवान्, मंगलायतनो हरिः ॥

लाभस्तेषां जयस्तेषां कुतस्तेषां परजयः ।
येषां इन्दीवर श्यामो हृदयस्तो जनार्दनः ॥

अकाल मृत्यु हरणं सर्व व्याधि उपशमनं ।
सर्वदुरोतोप शमनं श्री विष्णु पादोदकं शुभं ॥

## 61 VISARJANA PUUJA

आराधितानां देवतानां पुनः पूजास्म करिष्ये ॥
श्री बालकृष्णस्वामि देवताभ्यो नमः ॥

पूजांते छत्रं समर्पयामि । चामरं समर्पयामि ।
नृत्यं समर्पयामि । गीतं समर्पयामि ।
वाद्यं समर्पयामि । आंदोलिक् आरोहणं समर्पयामि ।
अश्वारोहणम् समर्पयामि । गजारोहणं समर्पयामि ।

श्री कृष्ण स्वामि देवताभ्यो नमः ।
समस्त राजोपचार , देवोपचार , शक्त्युपचार ,
भक्त्युपचार पूजां समर्पयामि ॥

## PUNAH PUJA

शान्ताकारं भुजग शयनं पद्मनाभं सुरेशम् ।
विश्वाधरं गगन सदृशं मेघ वर्णं शुभान्गम् ।
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यान गम्यम् ।
वन्दे विष्णुं भवभयहरं सर्व लोकैक नाथम् ॥

श्री बालकृष्णाय नमः ।ध्यायामि, ध्यानं समर्पयामि ॥
श्री बालकृष्णाय नमः ।आवाहयामि ॥
श्री बालकृष्णाय नमः ।आसनं समर्पयामि ॥
श्री बालकृष्णाय नमः ।पाद्यं समर्पयामि ॥
श्री बालकृष्णाय नमः ।अर्घ्यं समर्पयामि ॥
श्री बालकृष्णाय नमः ।आचमनीयं समर्पयामि ॥
श्री बालकृष्णाय नमः ।स्नानं समर्पयामि ॥
श्री बालकृष्णाय नमः ।पन्चामृत स्नानं समर्पयामि ॥
श्री बालकृष्णाय नमः ।महा अभिषेकं समर्पयामि ॥
श्री बालकृष्णाय नमः ।वस्त्रयुग्मं समर्पयामि ॥
श्री बालकृष्णाय नमः ।यज्ञोपवीतं समर्पयामि ॥
श्री बालकृष्णाय नमः ।गन्धं समर्पयामि ॥
श्री बालकृष्णाय नमः ।हस्तभूषणं समर्पयामि ॥
श्री बालकृष्णाय नमः ।नाना परिमल द्रव्यं समर्पयामि ॥
श्री बालकृष्णाय नमः ।अक्षतान् समर्पयामि ॥
श्री बालकृष्णाय नमः ।पुष्पाणि समर्पयामि ॥
श्री बालकृष्णाय नमः ।नाना अलन्काराणि समर्पयामि ॥
श्री बालकृष्णाय नमः ।अंग पूजां समर्पयामि ॥
श्री बालकृष्णाय नमः ।पुष्प पूजां समर्पयामि ॥
श्री बालकृष्णाय नमः ।पत्र पूजां समर्पयामि ॥
श्री बालकृष्णाय नमः ।आवरण पूजां समर्पयामि ॥
श्री बालकृष्णाय नमः ।अष्टोत्तर पूजां समर्पयामि ॥
श्री बालकृष्णाय नमः ।धूपं आघ्रापयामि ॥
श्री बालकृष्णाय नमः ।दीपं दर्शयामि ॥
श्री बालकृष्णाय नमः ।नैवेद्यं समर्पयामि ॥
श्री बालकृष्णाय नमः ।महा फलं समर्पयामि ॥
श्री बालकृष्णाय नमः ।फलाष्टकं समर्पयामि ॥
श्री बालकृष्णाय नमः ।करोद्वर्तनकं समर्पयामि ॥
श्री बालकृष्णाय नमः ।ताम्बूलं समर्पयामि ॥
श्री बालकृष्णाय नमः ।दक्षिणां समर्पयामि ॥
श्री बालकृष्णाय नमः ।महा नीराजनं समर्पयामि ॥
श्री बालकृष्णाय नमः ।कर्पूर दीपं समर्पयामि ॥
श्री बालकृष्णाय नमः ।प्रदक्षिणां समर्पयामि ॥
श्री बालकृष्णाय नमः ।नमस्कारान् समर्पयामि ॥
श्री बालकृष्णाय नमः ।राजोपचारान् समर्पयामि ॥
श्री बालकृष्णाय नमः ।मन्त्रपुष्पं समर्पयामि ॥

## 62 ATMA SAMARPANA

अनेन मया कृतेन, श्रीबालकृष्ण जन्माष्टमी व्रतेन,
श्री कृष्णः सुप्रीत सुप्रसन्न वरदा भवतु।
मध्ये मन्त्र, तन्त्र स्वर, वर्ण न्युनातिरिक्त,लोप, दोष,
प्रायश्चित्तार्थं अच्युतानन्तगोविन्द महा मन्त्र जपं करिष्ये ॥

ॐ अच्युथाय नमः ।ॐ अनन्ताय नमः । गोविन्दाय नमः ।

ॐ अच्युथाय नमः ।ॐ अनन्ताय नमः । गोविन्दाय नमः ।
ॐ अच्युथाय नमः ।ॐ अनन्ताय नमः । गोविन्दाय नमः ।
ॐ अच्युत अनन्त गोविन्देभ्यो नमः ॥

कायेन वाचा मनसेन्द्रियेर्वा, बुद्ध्यात्मना वा प्रकृतेः स्वभावात् ।
करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पयामि ॥

नमस्मरोमि, श्री कृष्ण देवता प्रसादं शिरसा गृह्णामि ॥

63 KSHAMAPANA

अपराध सहस्राणि क्रियन्ते अहर्निशं मया ।
तानि सर्वानि मे देव क्षमस्व पुरुषोत्तम ॥

यान्तु देव गन सर्वे पूजां आदाय पर्तिवीम् ।
इष्ट काम्यर्थ सिध्यर्थं पुनरागमनाय च ॥

(Shake the kalasha)

॥ श्री कृष्णार्पणमस्तु ॥

---

Transliterated by S. A. Bhandarkar
ProofReading Needed
Last updated on August 25, 1997
Please send corrections to shree@usa.net

[0]Last modification: July 6, 2003